अथ पंचमोऽध्यायः । संन्यासयोगः atha pañcamo'dhyāyaḥ| (sannyāsayogaḥ)

अर्जुन उवाच । arjuna uvāca |

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।

यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ ५.१ ॥

sannyāsaṁ karmaṇāṁ kṛṣṇa punaryogaṁ ca śaṁsasi |
yacchreya etayorekaṁ tanme brūhi suniścitam || 5.1||

श्रीभगवानुवाच । śrībhagavānuvāca |

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।

तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ ५.२ ॥

sannyāsaḥ karmayogaśca niḥśreyasakarāvubhau |
tayostu karmasannyāsātkarmayogo viśiṣyate || 5.2||

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्शति ।

निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ५.३ ॥

jñeyaḥ sa nityasannyāsī yo na dveṣṭi na kāṅkśati |
nirdvandvo hi mahābāho sukhaṁ bandhātpramucyate || 5.3||

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।

एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ५.४ ॥

sāṅkhyayogau pṛthagbālāḥ pravadanti na paṇḍitāḥ |
ekamapyāsthitaḥ samyagubhayorvindate phalam || 5.4||